# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ अष्टमः सर्गः ॥(विलक्षणलक्ष्मीपतिः)

**पुष्पिताग्रा**

अथ कथमपि यामिनीं(वँ्) विनीय
स्मरशरजर्जरितापि सा प्रभाते ।
अनुनयवचनं(वँ्) वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयम् ॥ 1॥

### ॥ गीतम् 17 ॥

(अथ सप्तदशप्रबन्धो भैरवीरागेण एकतालीताले गीयते)
रजनिजनितगुरुजागररागकषायितमलसनिमेषम् ।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥
हरिहरि याहि माधव याहि केशव मा वद कैतववादं(न्)
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥ 1॥

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम् ।
दशनवसनमरुणं(न्) तव कृष्ण तनोति तनोरनुरूपम् ॥ 2॥ याहि माधव

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम् ।
मरकतशकलकलितकलधौतलिपिरेव रतिजयलेखम् ॥ 3॥ याहि माधव

चरणकमलगलदलक्तकसिक्तमिदं(न्) तव हृदयमुदारम् ।
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ॥ 4॥ याहि माधव

दशनपदं(म्) भवदधरगतं(म्) मम जनयति चेतसि खेदम् ।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ॥ 5॥ याहि माधव

बहिरिव मलिनतरं(न्) तव कृष्ण मनोऽपि भविष्यति नूनम् ।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ॥ 6॥ याहि माधव

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥ 7॥ याहि माधव

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं(वँ) विबुधा विबुधालयतोऽपि दुरापम् ॥ 8॥ याहि माधव

(शिखरिणी)

तदेवं(म्) पश्यन्त्याः(फ्) प्रसरदनुरागं(म्) बहिरिव
प्रियापादालक्तच्छुरितमरुणच्छायहृदयम् ।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव

त्वदालोकः(श्) शोकादपि किमपि लज्जां(ञ्) जनयति ॥ 1॥

(शार्दूलविक्रीडितेन)

प्रातर्नीलनिचोलमच्युतमुरः(स्) सं(वँ)वीतपीतांशुकं,
राधायाश्चकितं(वँ) विलोक्य हसति स्वैरं सखीमण्डले ।
व्रीडाचञ्चलमञ्चलं(न्) नयनयोराधाय राधानने,
स्वादुस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः॥ 2॥

इति गीतगोविन्दे खण्डितावर्णने विलक्षणलक्ष्मीपतिर्नाम अष्टमः(स्) सर्गः

